# कुमारसम्भवम्
# पञ्चमः सर्गः

वि .ए . प्रथमः सेमेस्टारः
साम्मानिकः संस्कृतः

Presented by
Madhumita Pal
SACT-II
Saltora Netaji Centenary College

तथा समक्षं दहता मनोभवं
पिनाकिना भग्नमनोरथा सती।
निनिन्द रूपं हृदयेन पार्वती
प्रियेषु सौभाग्यफला हि चारुता।

अन्वय-पार्वती तथा समक्षं मनोभवंपिनाकिना दहता भग्नमनोरथा सती हृदयेन रूपं निनिन्द।हि चारुता प्रियेषु सौभाग्यफला।


कुमारसंभव
खंड - ४
संपादक व अनुवादक : सौ. अलकनंदा इनामदार
(एम.ए. संस्कृत)

शब्दार्थ-पार्वती-हिमालयदुहिता, तथा-पूर्वोक्तभावेन, समक्षं-पुरतः, मनोभवं-कामदेवं, पिनाकिना-महादेवेन, दहता-दग्धीकुर्वता, भग्नमनोरथा सती-खण्डिताभिलाषा, हृदयेन-मनसा, रूपं-आत्मनःसौन्दर्यं, निनिन्द्-निन्दितवती, हि-यतः, चारुता-सौन्दर्यं, प्रियेषु-प्रियजनेषु, सौभाग्यफला-सौभाग्यं लभते।

व्याकरणम्-
पार्वती-पर्वत+अपत्यार्थे ष्ञ +स्त्रियामीप्।
मनोभवं-मनसि भवति यस्मात्---उपपद तत्पुरुष।
निनिन्द-निन्द्+लिट् णल्।

इयेष सा कर्तुमवन्ध्यरूपतां
समाधिमास्थाय तपोभिरात्मनः।
अवाप्यते वा कथमन्यथा द्वयं
तथाविधं प्रेम पतिश्च तादृशः।।

अन्वय- सा समाधिम् आस्थाय तपोभिः आत्मनः अवन्ध्यरूपताम् कर्तुम् इयेष।अन्यथा कथम् तथाविधम् प्रेमः तादृशः च पतिः द्वयम् अवाप्यते।

संस्कृत शब्दार्थ-सा हिमालय  कन्या पार्वती, समाधिम्-एकाग्रताम्, आस्थाय-अवलम्ब्य, तपोभिः-वक्ष्यमाणनियमौः, आत्मनः-स्वस्य, अवन्ध्यरूपतां-सफलसौन्दर्यं, कर्तुम्-करणाय, इयेष-इच्छति स्म, अन्यथा-अन्यप्रकारेण, कथम्-केन, तथाविधम्-तादृशम्, प्रेमः-स्नेहः, पतिः च-भर्ता च, द्वयमेव-उभावेव, अवाप्यते-लभ्यते।

निशम्य चैनां तपसे कृतोद्यमां
सुतां गिरिशप्रतिसक्तमानसाम्।
उवाचमेना परिरभ्य वक्षसा
निवारयन्ती महतो मुनिव्रतात्।।

अन्वय-मेना गिरिशप्रतिसक्तमानसाम्
तपसे कृतोद्यमाम् च सुताम् निशम्य
एनाम् वक्षसा परिरभ्य महतः मुनिव्रतात्
निवारयन्ती उवाच।

संस्कृत शब्दार्थः मेना-हिमालयपत्नी मेनका, गिरिश प्रतिसक्त मानसाम्-शिवासक्तचित्तां, तपसे च-तपश्चरितुं च, कृतोद्यमाम्-उद्यताम्, सुताम्-कन्याम्, निशम्य -श्रुत्वा, एनाम्-पार्वतीम्, वक्षसा-उरसा, परिरभ्य-आलिङ्ग्य, महतः-कठिनात्, मुनिव्रतात्-तपसः, निवारयन्तीम् -निवारण-कुर्वन्तीम्, उवाच-अवदत्।

व्यकरण-

निशम्य-नि--शम्+ल्यप्।

उवाच-व्रु+लिट् णल्।

निवारयन्ती-नि--वृ+णिच्+शतृ+स्त्रियामीप्।

# धन्यवादन्तो